# SANSKRIT

*(Maximum Marks: 80)*

*(Time allowed: Three Hours)*

*(Candidates are allowed additional 15 minutes for **only** reading the paper.*

*They must NOT start writing during this time.)*

---

*Answer **all** questions from **Sections A** and **B** and **any four** questions from **Section C**.*
*If you answer two questions or more on any one book, do not base them on the **same** material.*
*The intended marks for questions or parts of questions are given in brackets [].*

---

## SECTION A – 18 MARKS

*Answer **all** questions.*

**Question 1**

(i) Disjoin Sandhis of *any three* of the following words. **[3]**

अधोदत्तानां केषाञ्चित् त्रयाणां शब्दानां सन्धिविच्छेदं कुरुत ।

यथात्र, गुरुकुलादेव, सृजाम्यहम्, द्वावपि, नैते

(ii) Expound *any three* of the following words, giving the names of the compound. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां समस्तपदानां विग्रहं कृत्वा समासस्य नाम अपि लिखत ।

चक्रहस्तः, पञ्चपात्रम्, मनोबलम्, पुरुषव्याघ्रः, रामकृष्णौ, अधर्मः

(iii) Split *any three* of the following words. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां पदानां प्रकृतिप्रत्ययविभागं कुरुत ।

ध्येयम्, प्राप्तवान्, जानन्, उपविश्य, श्रोतुम्, कुर्वन्

(iv) Change the voice of *any three* of the following sentences. **[3]**

अधोलिखितानां केषाञ्चित् त्रयाणां वाक्यानां वाच्यं परिवर्तयत ।

(a) मया सः मन्दिरे दृष्टः ।

(b) सा अत्र प्रतिदिनम् आगच्छति ।

(c) मोहनः श्यामं पाठयति।

(d) तेन बालकः ताडितः ।

(e) भवान् ह्यः कथां श्रुतवान् ।

(f) त्वं रात्रिकाले किं करोषि ?

---

**This Paper consists of 4 printed pages.**

1224-838

© *Copyright reserved.*

**Turn over**

**Question 2** **[6]**

Translate the following passage into Sanskrit.

अधोलिखितस्य अनुच्छेदस्य संस्कृतभाषया अनुवादं कुरुत ।

India has always been the center of attraction for the world. The coexistence of diverse cultures and languages makes it a truly unique land. It offers valuable things to learn and imbibe. Ayurveda and Yoga are two of its valuable offerings. These practices have been followed for physical and mental nourishment. Both these systems of ancient wisdom restore the harmony between mind and body and contribute to a healthy life.

## SECTION B – 34 MARKS

*Answer **all** questions.*

**Question 3**

Translate the following passages into English.

अधोलिखितयोः गद्यांशयोः आङ्गलभाषया अनुवादं कुरुत ।

(i) एकदा तु तत्रस्थ एव इन्द्रायुधम् आरुह्य, मृगयानिर्गतः विचरन् काननं शैलशिखरात् यदृच्छया अवतीर्णं किन्नरमिथुनम् अद्राक्षीत् । अपूर्वदर्शनतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषः तत्समीपम् उत्सर्पन्, अदर्शनपूर्वपुरुषदर्शनत्रासात् पलायमानं तत् सुदूरम् अपससार ॥ इदं गृहीतम्, इदं गृहीतम्, इति अतिरभसाकृष्टचेताः महाजवतया तुरङ्गस्य तस्मात् प्रदेशात् असहायः पञ्चदशयोजनमात्रं संमुखापतितम् अत्युच्छ्रितम् अचलशिखरम् आरुरोह । **[6]**

(ii) तदालोकनमात्रेणैव अपगतश्रमः तस्य दक्षिणं तीरमासाद्य तुरगात् अवततार । अवतीर्य च व्यपनीतपर्याणम् इन्द्रायुधं क्षितितललुठितोत्थितं गृहीतकतिपययवसग्रासं सरोवतार्य पीतसलिलम् इच्छया स्नातं च उत्थाप्य समीप-वर्तिनः तरोः मूलशाखायां कनकमय्या शृङ्खलया चरणौ बद्ध्वा, स्वयमपि सलिलम् अवततार । प्रक्षालितकरयुगलः जलमयम् आहारं कृत्वा, सरः सलिलात् उदगात् । प्रत्यग्रभग्नैः अतिशिखिरैः कमलिनीपलाशैः लतामण्डप-परिक्षिप्ते-शिलातले स्रस्तरम् आस्तीर्य निषसाद । **[6]**

**Question 4**

Translate the following verses into English.

अधोलिखितयोः पद्यांशयोः आङ्गलभाषया अनुवादं कुरुत ।

(i) द्वेष्योऽस्ति संमतः शिष्टस्तस्यार्तस्य यथौषधम् । [7]
त्याज्यो दुष्टः प्रियोप्यासीदङ्गुलीवोरगक्षता ॥ 1.28
तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः ॥ 1.29

(ii) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् । [7]
यशसे विजिगीषूणाम् प्रजायै गृहमेधिनाम् ॥ 1.7
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ 1.8

**Question 5**

Explain the following with reference to the context.

अधोलिखितयोः उद्धरणयोः सन्दर्भप्रसङ्गाभ्यां सह व्याख्यां कुरुत ।

(i) अत्रान्तरे चन्द्रमण्डलात् विनिर्गतः दिव्याकृतिः पुरुषः गगनात् अवतीर्य । [4]

(ii) अथ महाश्वेता कादम्बरीम् अनामयं पप्रच्छ । [4]

## SECTION C – 28 MARKS

*Answer **any four** questions.*

**Question 6** [7]

दिलीपस्य शरीरस्य शोभा कीदृशी आसीत् ? के च तस्य प्रसिद्धाः गुणाः आसन् ?

**Question 7** [7]

महर्षिः वशिष्ठः दिलीपस्य सन्तानहीनतायाः विषये किं वृत्तान्तम् अवदत् ?

**Question 8** **[7]**

यदा महर्षिः वशिष्ठः दिलीपं तस्य राज्यस्य क्षेम-विषये अपृच्छत् तदा दिलीपः किम् अवोचत् ?

**Question 9** **[7]**

चन्द्रापीडस्य यात्रायाः क्रमेण वर्णनं कुरुत । सः किन्नरमिथुनं कुत्र अपश्यत् ?

**Question 10** **[7]**

चाण्डालकन्यका शूद्रकम् उपसृत्य तस्मै किं निवेदितवती ? राजा वैशम्पायनं किं किम् अपृच्छत् ।

**Question 11** **[7]**

महाश्वेता कादम्बर्याः भवनं गत्वा चन्द्रापीडस्य विषये कथम् अवर्णयत् ? सम्पूर्णं वृत्तान्तं विस्तरेण लिखत ।

---